# Punyodaya Prashasti Ashtakam

# पुण्योदयप्रशस्त्यष्टकम्

## Document Information

Text title : Punyodayaprashasti Ashtakam

File name : puNyodayaprashastI.itx

Category : deities_misc, gurudev, aShTaka

Location : doc_deities_misc

Author : nyAyavijayamuni

Transliterated by : P. Jayaraman vyshupjr at gmail.com

Proofread by : P. Jayaraman vyshupjr at gmail.com, NA

Acknowledge-Permission: https://stotra.wordpress.com

Latest update : March 2, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

Punyodaya Prashasti Ashtakam

# पुण्योदयप्रशस्त्यष्टकम्

पुण्यमूर्तिः पुण्यचेताः पुण्यधीः पुण्यवाङ्महाः ।
पुण्यकर्मा पुण्यशर्मा श्रीपुण्यविजयो मुनिः ॥ १॥

निसर्गवत्सलो धीरो विशालहृदयस्तथा ।
परोपकारप्रवणो नम्रसौम्यस्वभावभाक् ॥ २॥

उदात्तचिन्तनो दीप्रप्रज्ञो वाचंयमस्तथा ।
निर्भीकः सत्यसामर्थ्यप्रभाप्रसृमरोदयः ॥ ३॥

जैन-वैदिक-बौद्धानां शास्त्रेषु सुविशारदः ।
सम्माननीयो विदुषां विद्यासंस्थेव जङ्गमा ॥ ४॥

यदीयो व्यवसायश्च मुख्यरूपेण वर्तते ।
श्रेष्ठपद्धतितः प्राच्यशास्त्राणां परिशोधनम् ॥ ५॥

बहुप्राचीनशास्त्राढ्यभाण्डागारावलोकनम् ।
कृत्वा श्रमेण योऽकार्षीत् तेषामुद्धारमुत्तमम् ॥ ६॥

महामेधाविना येन प्राचीना बहुगौरवाः ।
ग्रन्थाः सम्पादिताः सन्ति विद्वदानन्दकारिणः ॥ ७॥

विद्यासङ्गपरायणो मुनिपदालङ्कारभूतक्रियः
    श्रेष्ठाचारविचारपूतविकसद्वैदुष्यनिष्पादितम् ।
भव्यश्लोकमनल्पधाममहिमा बिभ्रन्महासात्त्विको
    जीयाद् विश्वजनाय पुण्यविजयः पुण्यप्रकाशं दिशन् ॥ ८॥

इति मुनि न्यायविजयविरचितं पुण्योदयप्रशस्त्यष्टकं समाप्तम् ।

Encoded and proofread by P. Jayaraman vyshupjr at gmail.com, NA

*Punyodaya Prashasti Ashtakam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*